३. द्र०, अश्वशास्त्रं नकुलकृतम्; सं०टी० चन्द्रशेखरन् मद्रास गवर्नमेण्ट ओरियण्टल सीरीज प्रकाशन, १९५१।

अशुभैर्लक्षणैर्युक्ता हया न वाहनोचिताः।
अतो लक्षणमेवादौ तेषां व्याख्यामि देहजम्।।
ओष्ठयोः सृक्विणोश्चैव जिह्वायां दशनेषु च।
वक्रे तालुनि नासायां गण्डयोर्नेत्रयोस्तथा।।
ललाटे मस्तके चैव केशकर्णपुटे तथा।
ग्रीवायां केसरे चापि स्कन्धे वक्षसि बाहुके।।
जङ्घायां जानुनोश्चाधः कूर्चे पादे तथैव च।
पार्श्वयोः पृष्ठभागे च कुक्षौ कट्यां च वालधौ।।
मेहने मुष्कयोश्चापि तथैवोरुद्वयेऽपि च।
आवर्ते च खुरे पुच्छे गतौ वर्णे स्वरे तथा।।
महादोषं त्यजेत्प्राज्ञश्छायायां गतिसत्त्वयोः।
प्रधानस्यैव वाहानां लक्षणं यत्प्रतिष्ठितम्।।
शुभाशुभविवेकाय तद्विद्याबुद्धिमान् भिषक्।
शालिहोत्रादिभिः सम्यक् त्रिकालज्ञानकोविदैः।।
आताम्रौ पूजितौ चोष्ठ बलहीनौ मृदुत्वचौ।
सुप्रोस्थस्तु नतः शस्तो विपरीतं विवर्जयेत्।।
सृक्विण्योर्मृदुता शस्ता जिह्वायां रक्तता तथा।
अतश्चान्यद्धि दोषाय तन्वी दीर्घा च सा शुभा।।
घनाः स्निग्धाः सुबद्धाश्च समा दन्ताः सुशोभनाः।
षट्संख्येष्वधनं वृत्तैस्तेषु व्यञ्जनबिन्दवः।।
आयतं तुरगाणाञ्च निर्माणं प्रियदर्शनम्।
सुगन्धं पूजितं वक्रं विपरीतं सुगर्हितम्।।
तालु रक्तं प्रशस्तं च सम्पुटे चैव नासिके।
नातितूणसमौ गण्डौ वाहानां कीर्तितौ शुभौ।।
अक्षते निर्गदे चैव मेघाभे कलतारके।
स्निग्धायते विशाले च श्रेष्ठे मधुनिभेक्षणे।।

कनकप्रतिसङ्काशे शस्ते वाहस्य लोचने।
सांवर्त च विशालं च अनिम्नं चैव वाजिनः।।
ललाटपूजितं प्राहुर्मुनयः शास्त्रकोविदाः।
शिरः समं तथा वृत्तं आवर्तद्वयभूषितम्।।
केशाश्च मृदवश्चैव वाहानां चैव पूजिताः।
ऋजुता कर्णयोश्चैव तीक्ष्णता तनुता तथा।।
अदीर्घरोमता चैव प्रशस्ता च प्रकीर्तिता।
सुवृत्तां कुञ्चितां चैव भिन्नां ग्रीवां विदुर्बुधाः।।
केसरं च जटाहीनं मृदुलं च प्रशस्यते।
सुबद्धौ च दृढौ चैव स्कन्धौ वाहस्य पूजितौ।।
वक्षः प्रशस्तं विपुलं निर्घातं विशिरं च तत्।
ऋजू वक्षः समौ बाहू गूढजानू प्रशस्यते।।
अवक्रा मांसहीना च वाजिजङ्घा प्रशस्यते।
शुभं स्मृतं सुवृत्तं च समं चैव नतोन्नतम्।।
कूर्चमेवंविधं विन्द्यात्कम्पव्रणविवर्जितम्।
दृढमण्डूकिकायुक्तो वर्तुलः श्लिष्टसन्धिकः।।
सुरः खुरखुराकारः प्रशस्तः समुदाहृतः।
पार्श्वे चैव समे वृत्ते ऊर्ध्वमांसोपशोभिते।।
अविलम्बि सुवृत्तं च उदरं चातिपूजितम्।
नातिदीर्घसमं पृष्ठं किञ्चिच्च विनतं शुभम्।।
सुवृत्ता चैव पीना च कटिर्धन्या प्रकीर्तिता।
मृदुस्निग्धायतैर्युक्तं वालैः पुच्छं प्रशस्यते।।
वृषणौ च समौ वृत्तौ अखर्वौ चाप्यरोमशौ।
कृष्णवर्णविहीनं तु ह्रस्वं मेढ्रमिहेष्यते।।
अनुपूर्वं परं चैव शोभनोरुद्वयं मतम्।
पूर्वजङ्घे च जङ्घे च खुरान्तं चापि पश्चिमम्।।
शालिहोत्रादिभिः प्रोक्तं मुनिभिः पूर्ववेदिभिः।।

अश्वशास्त्रोक्तोऽश्वलक्षणोपोद्घातः

इदानीं लक्षणं कृत्स्नं तुरङ्गाणां प्रवक्ष्यते।
आवर्तवर्णसत्त्वानि छायागन्धगतिस्वराः।।
शरीरं चैव वाहानां प्रोक्तं लक्षणमष्टधा।
शरीरनाम्नि तत्सर्वं लक्षणं शुभनिन्दितम्।।
श्रेष्ठं तस्मात्तुरङ्गाणां शरीरं त्वाद्यलक्षणम्।
सत्त्वं ततो द्वितीयं च तृतीयं वर्ण उच्यते।।
चतुर्थी तु गतिर्ज्ञेया पंचमस्तु स्वरस्तथा।
गन्धः षष्ठस्तु विज्ञेयश्छाया चैव तु सप्तमी।।
आवर्तमष्टमं ज्ञेयमेतल्लक्षणमष्टधा।।

अश्वशास्त्रोक्तो दशाक्षेत्रविचारः

दशास्तेषां दशाख्याताः क्षेत्राण्यपि दशैव हि।
दशाक्षेत्रविभागज्ञो लक्षणं लक्षयेद्बुधः।।
त्रीणि वर्षाणि मासौ द्वौ दिनानि द्वादशैव हि।
द्वात्रिंशदायुषो वाजी तस्यैषा कथिता दशा।।
आयुषो दशभागेन दशा प्रोक्ता मनीषिभिः।
आद्यं क्षेत्रं विन्द्यात्प्रपानपूर्वं तथा ललाटान्तम्।।
मूर्धादिं च निगालं क्षेत्रं प्रोक्तं द्वितीयं तु।
ग्रीवा केशस्कन्धौ क्षेत्रं विन्द्यात्तृतीयमश्वानाम्।।
जत्रुस्तथैव ककुदं काकसमंसश्चतुर्थं तु।
पूर्वगात्रविभागः प्रोक्तं क्षेत्रं तु पञ्चमं कथितम्।।
हृत्पार्श्वे त्वथ कक्षे दोत्रं षष्ठं विजानीयात्।
उदरं पृष्ठं वंशं नाभ्या सह सप्तमं क्षेत्रम्।।
रन्ध्रोपरन्ध्रे कुक्षिर्गुह्यं तथाष्टमं क्षेत्रम्।
ऊरू कटिजानू च सूक्ष्मपिण्डो पाण्डुरोहिणीस्थूरौ।।
क्षेत्रं नवमं विन्द्याज्जङ्घा सखुरा तु दशमित्युक्तम्।।

अश्वशास्त्रोक्त आवर्तलक्षणाध्यायः

अथ तावत्प्रवक्ष्यामि पूर्वमावर्तलक्षणम्।
यथा महीतले वायुश्चरन् वेगं तृणाङ्कुरान्।।
आवर्तरूपं कुरुते तथाऽऽवर्ता हयोद्भवाः।
आवर्तशुक्तिसङ्घातमुकुलान्यवलीढकम्।।
शतपादी पादुकार्थं पादुका चाष्टमी स्मृता।
आवर्तकृतश्चैता अष्टौ सम्परिकीर्तिताः।।
आसां रूपं विशेषेण पुनः कथितमुत्तरे।
तत्र प्रधाने ह्यावर्तः शुक्तिश्चापि शुभा मता।।
शतपादी पादुका च शुक्तिश्चापि षडङ्गुला।
पादुका ह्यङ्गुला चैव मुकुलं तद्वदुच्यते।
विभागाङ्गुलमावर्तमानमेषामिति स्मृतम्।।
प्रासादाम्बुजवक्रतोरणधनुर्निस्त्रिंशशाखोपमः।
निःश्रेणीयमचातुरन्तिकशशित्रेताऽग्निभिः सन्निभः।।
खर्जूराङ्कुशचामरध्वजरथाङ्गाश्वत्थपत्राकृतिः।
वेदीस्वस्तिकमत्स्यपूर्णकलशश्रीवृक्षस्त्रक्सन्निभः।।
सूर्पाष्टापदवज्रलाङ्गलगदाचन्द्रार्थयूपाकृतिः।
सृक्कूर्मातपवारणोत्पलमुखोऽनेकः प्रशस्ताकृतिः।।
आवर्तास्तु तुरङ्गाणां ध्रुवा निन्द्याः शुभास्त्रिधा।
तेषां ध्रुवा दश मताः स्थानानि च दशैव हि।।
उरसि द्वौ शिरसि द्वौ तथैव रन्ध्रोपरन्ध्रयोर्द्वौ द्वौ।
एकं ललाटमध्ये विद्यादेकं प्रपाने तत्।।
एते स्वस्थानस्थाः प्रदक्षिणाः सुप्रभाः शस्ताः।
एतैर्विना तुरङ्गः स्वल्पायुः पापलक्षणस्त्वशुभः।।
स्थानभ्रष्टावर्तो विच्छिन्नो न प्रशस्यते वाऽपि।
स्थानानि नवतिः षट् च तेष्वावर्तशतं स्मृतम्।।

त्रयोदश विजानीयादेते चामन्यवः स्मृताः।
द्विविधः सङ्ग्रहस्तेषां प्रशस्तो निन्दितस्तथा।।
स्थानानि तेषां पूज्यानि निर्दिष्टानि च विंशतिः।
षट्सप्ततिश्च निन्द्यानि इति षण्णवतिः स्मृताः।।
स्थाने द्वे सृक्विणी प्रोक्ते तयोर्द्वौ रोमजौ स्मृतौ।
ललाटे चैव चत्वारि स्थानानि पृथगेव हि।।
तेष्वपि द्वादशावर्ता यमौ त्रेताग्नयस्त्रयः।
त्रिभिर्निःश्रेणिका नाम चतुर्भिश्च तुरङ्गकः।।
आवर्तः पूजितो नित्यं शिरोमध्ये व्यवस्थितः।
स्थानमेकं तु विज्ञेयं स्थाने द्वे कर्णमूलयोः।।
स्थानं निगालस्त्वेकं स्यात्कण्ठे चैकं प्रकीर्तितम्।
केशान्तयोश्च स्थाने द्वे तयोः शुक्तिद्वयं विदुः।।
श्रीवृक्षो वक्षसि प्रोक्तो ह्यावर्तैः पञ्चभिर्भवेत्।
अन्ये द्वे वक्षसि स्थाने चतुर्भिस्त्रिभिरेव च।।
बाह्वोः स्थानद्वयं प्रोक्तं तत्रावर्तद्वयं विदुः।
द्वे चोपरन्ध्रयोः स्थाने द्वौ स्थितौ रोमजौ तयोः।।
एवं शुभानि स्थानानि यान्युक्तानीह विंशतिः।
भवन्ति रोमजास्तेषु सप्तविंशतिसंख्यया।।

अथ खलु कण्ठशंखमन्याश्रुपातेषु नासापुटस्कन्धजानुस्फिग्गुदे पिण्डाण्ड-गण्डेषु कर्णाग्रकुक्षिस्थुरामूत्रकोशेषु वै हनुवहविदुकक्षोरुपार्श्वेषु पुच्छस्य मूले भ्रुवोर्मध्यभागे हयानां प्रदेशेष्वथावर्तरूपद्वयं लक्षयेत्। त्रिकगलककुदुत्तरोष्ठासनप्रोथ-घोणासु नाभौ हृदि क्रोडसीवन्यपानेषु वै काकसे चैकमेकं विदुर्वाजीनां रोमजाता उपरि च कथिता प्रपानस्य चान्ये त्रयो रोमजा कुष्ठिकाकूर्चजंघाकलासु चैव चतुर्ष्वेव पादेषु वै षोडशावस्थिताः।

इति षट्सप्ततिरशुभावर्ता वाजिनां मुनिप्रोक्ताः।
सर्वेषां परिसंख्याताः शतं त्रयोविंशतिश्च।।
अधुना शुभाशुभफलं स्वल्पैरेवाक्षरैः प्रभृतम्।
लक्षणमावर्तानां पृथक्पृथक्सम्प्रवक्ष्यामि।।

आवर्तो सुक्विस्थौ शुक्ती वा यस्य वाजिनः स्याताम्।
प्राप्नोति चेष्टमन्नं भर्ता पुत्राश्च पौत्राश्च।।
यस्याश्वस्य भवेतां ललाटजौ द्वौ प्रदक्षिणावर्तौ।
तस्य स्वामी विजयी बहुप्रजो जयति रिपुसैन्यम्।।
यस्य त्रेताग्निनिभाः प्रदक्षिणा वै त्रयो ललाटस्थाः।
तस्य स्वामी विजयी स तु तिष्ठति मूर्ध्नि शत्रूणाम्।।
निःश्रेणी यस्य भवेत्त्रिभिरावर्तैर्ललाटमध्ये तु।
तेनाश्वेन तु राजा लभते विजयं धनं धान्यम्।।
सर्वैरावर्तैर्वाजी चतुरङ्गस्थितैर्ललाटे च।
कुरुते स्वामिनमचिरान्महीपतिं पुत्रवन्तं च।।
आवर्तो मुकुलाभः शिरःप्रदेशे प्रदक्षिणो यस्य।
तस्य हयस्य तु भर्ता संग्रामे जयति रिपुसैन्यम्।।
आवर्तौ वृषभाख्यौ ज्ञेयौ तुरगस्य कर्णमूलस्थौ।
ताभ्यां स्वामी विजयी लभतेऽलङ्कारनिकरांश्च।।
आवर्तस्तु निगाले देवमणिः सर्वकामदश्चासौ।
राष्ट्रसुतकोशसम्पत्सौख्यानि विविधानि विजयं च।।
आवर्तान्हन्त्यशुभानग्रिमकाये ककुद्भवं मुक्त्वा।
तत्रारूढो नृपतिर्जयति रणे शत्रुसैन्यानि।।
यस्योपरन्ध्रभागे रोमावर्तः प्रजायते श्रीमान्।
तस्य स्वामी विजयी रणमूर्ध्नि भवति शत्रूणाम्।।
आवर्तः कण्ठस्थः शुक्तिर्वा रोचमान इत्युक्तः।
राज्ञस्तेनाश्वेन कोशो मित्राणि वर्धन्ते पुत्राः।।
रोचमानस्तु पूर्वार्धे निःश्रेणी शिरसि स्थिता।
पश्चादर्थे मेषली सर्वानशुभान्हन्ति रोमजान्।।
केशान्तयोश्च शुक्ती यस्य द्वे तुरगस्य दृश्येते।
तस्य स्वामी विजयी संवर्धते पुत्रपौत्रैश्च।।

आवर्ता वक्षःस्थाश्चतुर्ष्वपि यस्य चत्वारः।
कण्ठे च रोचमानः सोऽश्वः श्रीवृक्षकीनामा।।
तेनाजौ रिपुसैन्यं विजित्य निवर्तते राजा।
प्राप्नोत्यर्थान् सकलान् राष्ट्रं सौख्यं यशश्चैव।।
वक्षसि यस्यावर्ताश्चत्वारस्तस्य वाजिनः स्वामी।
प्राप्नोति रणे विजयं वित्तं निष्कण्टकं राज्यम्।।
शुक्त्यो वक्षसि तिस्रो यस्य स्युः सर्वमानदः सोऽश्वः।
तेनासौ विजितारिः स्वस्थो विनिवर्तते राजा।।
बाह्वोर्यस्यावर्तो शुक्तिर्वा सोऽङ्गदी हयः प्रोक्तः।
प्राप्नोति यस्य भर्ता रत्नान्याभरणनिकरांश्च।।
आवर्तो रन्ध्रोपरि यस्यास्त्येष मेखलीनामा।
तेनैश्वर्यं भवति भवन्ति पुत्राश्च पौत्राश्च।
एते शुभाः प्रशस्ताः सप्तत्रिंशद्रोमजाः कथिताः।।

अशुभावर्तफलम्

स्थानान्येषां विंशतिरशुभानां फलमतो वक्ष्ये।
आवर्तौ कटजौ हयस्य शुभौ भर्तुः कुलस्यान्तकौ।।
भर्तुः सर्वकुलक्षयं प्रकुरुतः शङ्खोद्भवौ रोमजौ।
आवर्तौ वहजौ हयस्य भयदौ भ्रूमध्यजौ रोमजौ।
वित्तघ्नौ बिन्दुमध्यजौ च सुतरां चानर्थदौ स्वामिनाम्।।
आवर्ता हनुमन्युकूर्चगलजा स्कन्धोरुकुक्ष्युद्भवा
यस्याश्वस्य च भर्तुरध्वनि सदा बाणौघघातिर्भवेत्।
आवर्तौ हनुजौ धनक्षयकरौ मन्योद्भवौ मृत्युदौ
भर्तुर्जीवितनाशनौ तु सततं स्कन्धोद्भवौ रोमजौ।।
आवर्तौ दृढशोकदुःखभयदौ यौ चाश्रुपातोद्भवौ
स्यातां भर्तृकुलस्य नाशनकरौ स्फिक्पिण्डजौ रोमजौ।
आवर्तौ गलमध्यजौ गलगदं क्षुद्दुःखमृत्युप्रदौ
भर्तुर्बन्धनदुःखरोगभयदौ जङ्घोद्भवौ रोमजौ।।

आवर्तश्चोत्तरोष्ठे यदि भवति तदा भ्रातरं हन्ति भर्तुः
प्रोथावर्ती तुरङ्गः सकलकुलमसौ नाशयत्याशु भर्तुः।
कक्षावर्तः शरोघैः परिकरसहितं स्वामिनं हन्ति शीघ्रं
घोणावर्तश्च भर्तुर्जनयति तुरगः कश्मलं मृत्युमाशु।।
गण्डावर्तस्तुरङ्गो भयशतजननः स्वामिनो मृत्युदूतो
जान्वावर्तस्तुरङ्गः क्षपयति सकुलं स्वामिनं तीव्रशोकैः।
प्रायश्चौरादिशस्त्रानलविषभयदः स्यान्महादोषसंज्ञः
शालायां न प्रवेश्यो नरपतिमचिराच्चालयत्याशु राज्यात्।।
आवर्तमश्वस्य ककुद्भवं तं विद्यान्महादोषतमं सुरौद्रम्।
स यस्य वाजी सकुलस्य तस्य वित्तक्षयो राज्यविनाशनं च।।
तं न स्पृशेद्भर्तृहणं न पश्येद् देवद्विजेभ्यस्त्वचिरेण दद्यात्।
निष्कासयेद्वापि च जातमात्रं शीघ्रं त्यजेद्वापरराष्ट्रमध्ये।।
स्याद्रोमजो यस्य तु काकसोद्भवस्तस्यापि भर्ता सह तेन वाजिना।
आजौ हतः काकशतैश्च भक्ष्यते उत्क्रोशयद्भिर्गुरुवैरवस्वरैः।।
पार्श्वोद्भवे यस्य हि रोमजौ तु भर्ता स पक्षस्तुरगस्य तस्य।
आशु क्षयं याति यथा निदाघे स्पृष्टं जलं भास्कररश्मिजालैः।।
क्रोडोद्भवस्त्वासनमध्यजो वा स्याद्रोमजो यस्य तुरङ्गमस्य।
स स्वामिनं हन्त्यचिरादवश्यं मार्गे स्थितं राजकुले रणे वा।।
कर्णावर्तो भर्तुः कर्णच्छेदं च कर्णमूले वा।
मध्यस्थः स्वामिवधं त्रयं प्रमाणोपरि स्थिता ह्येते।।
नासापुटयोर्भर्तुर्वित्तविघातं ध्रुवं कुरुते।
कुर्याद् हृदयावर्तो हृदि शोकं बन्धनं मरणम्।।
उपरि स्थितः प्राणे प्रदक्षिणोऽश्वस्य रोमजो यस्य।
भर्तुः पितरं हन्यात्कुर्याद्वा भ्रातृवधं च शुचम्।।
आवर्ताः सीवन्यां येषां कुक्षौ वपनादेशेषु।
ते कुक्षिव्याधिकरा भर्तुर्न सुखावहाः कथिताः।।

दृष्टौ यस्यावर्तौ पुच्छस्य मूले तु सञ्जातौ।
भर्ता तस्य सशल्यो बाणहतः सन्त्यजेत्प्राणान्।।
भर्तुर्दशनाकर्षौ रोमजौ यस्य मूत्रकोशस्थौ।
मुष्कोद्भवौ च विन्द्याज्ज्येष्ठसुतघ्नं च रोमजौ नूनम्।।
नाभौ यस्यावर्तास्तस्य तु भर्ता चिरं ससन्तानः।
रोगैर्जलोदराद्यैः पीड्येत च नात्र सन्देहः।।
त्रिकजो यस्यावर्तः सह भर्त्राऽसौ रणे त्यजेत्प्राणान्।
खुरजो यस्यावर्तः स वध्यते स्वामिनैव सह।।
यस्याश्वस्यावर्ताः सम्भूता कुष्ठिकासु दृश्यन्ते।
भर्ता तस्य व्यसनैः सुदारुणैः पीड्यते सततम्।।

अश्वशास्त्रोक्तः पुण्ड्रलक्षणाध्यायः

अत ऊर्ध्वं प्रवक्ष्यानि पुण्ड्राया लक्षणं शुभम्।
प्रपानोर्ध्वं तु कर्णाधः श्वेतं श्वेततरं च यत्।।
तत्पुण्ड्रमिति विज्ञेयं तस्य संस्थानतः फलम्।
कमलदलकलशहलमुसलपताकाध्वजाङ्कुशादर्शैः।
श्रीवृक्षशङ्खछत्रस्वस्तिकभृङ्गारवज्रनिभैः।।
चामरकूर्माष्टपदवेदीखड्गोपमैर्हयाः।
पुण्ड्रैः कथयन्ति जयं भर्तुर्विभवं पुत्रांश्च पौत्रांश्च।।
चतुरस्त्रैर्हयाः पुण्ड्रैः सर्वश्वेतमुखाश्च ये।
पुण्ड्रं खड्गोपमं यस्य स तु धन्यतमः स्मृतः।।
अथ स्वस्थस्तु पुण्ड्रश्च सर्वकामफलप्रदः।
कामार्थसिद्धिदो भर्तुर्भूयाच्छ्रेष्ठस्तु कक्षया।।
अथ तिर्यगायतेन हि वित्तभ्रंशं विजानीयात्।
कल्माषेण क्लेशं शूलकबन्धोपमेन दुःखं च।।
अथ पाशशृङ्खलालाभेन पुण्ड्रेण बन्धनं भर्तुः।
एतानि तुरङ्गाणां पुण्ड्राणि शुभाशुभानि कथितानि।।

प्रोथे पुण्ड्रं प्रपाने च वामपार्श्वे च नेष्यते।
कण्ठघण्टाश्रिते पुण्ड्रे वर्जनीयस्तुरङ्गमः।।
जिह्वाकल्माषरुक्षाणि विचित्राणि तनूनि च।
पुण्ड्राणि न प्रशस्यन्ते पीतरक्तसितानि च।।
धन्याधन्यान्यन्यानि ललामरूपाणि वक्ष्यन्ते।
श्वेतं ललाटमध्ये तारारूपं हयस्य यद्भवति।।
यत्तु ललामं विद्यात्फलं तु संस्थानतस्तस्य।
चन्द्रार्थचन्द्रदिनकरतारावद्द्योतते ललामं तत्।।
यस्य तुरगस्य भवेत्तस्य स्वामी भवेद्राजी।
पटहाकृति च ललामं काकपादं भवति यच्च विचित्रम्।।
वामस्थं वाऽधस्ताद्वित्तविनाशाय निर्देश्यम्।।

उक्तं च शालिहोत्रेण—

एवं पुण्ड्रविकल्पांस्तु शृणु चिह्नैश्च चिह्नितान्।
शिरःकर्णाक्षिकेशेषु वामपादोदराननने।।
वर्णान्यत्वं भवेद्यस्य तैश्चिह्नैश्चिह्नितं विदुः।
तमारुह्य हयं राजा सपत्नान् जयते रणे।।
श्रुतौ ललाटे घोणायां मस्तके ककुदे त्रिके।
भ्रुवोः कर्णाग्रयोः प्रोथे मेहनाग्रे च वालधौ।।
वर्णः परो यस्य भवेद्भयदोऽश्वः प्रकीर्तितः।
ध्वजिनं तं समारुह्य भग्नो राजा निवर्तते।।

अश्वशास्त्रोक्तं ह्रेषितशुभलक्षणम्

दृष्ट्वा हि पूर्णपात्रं च ब्राह्मणं कुसुमानि च।
दधि चापि समालोच्य वाहानां ह्रेषितं शुभम्।।
वादित्रध्वनिमाकर्ण्य ह्रेषन्ते यदि वाजिनः।
ग्रासपूर्णमुखाश्चैव तदा भर्तुर्जयो भवेत्।।

बाले च निर्गते वृद्धे क्षुधिते च पिपासिते।
श्रान्ते पीते तथा वाहे न ग्राह्यं स्वरलक्षणम्।।
ध्वजाग्रं चैव सूर्यं च पश्यन्तो वाजिनो यदा।
ह्रेषन्ते चाहवे स्पष्टं तदा विन्द्याज्जयं प्रभो:।।
वक्ष्यामि ह्रेषितानां लक्षणमधुना समासेन।
नाभिदेशादूर्ध्ववायो: प्राणस्य धावतो हृदये।।
कण्ठे शिरसि च घाताच्छब्दस्तद्ध्रेषितं विन्द्यात्।।
गम्भीरस्तु महान्स्वर: सुमधुर: स्निग्धो घन: संहत:
सिंहव्याघ्रगजेन्द्रदुन्दुभिघन: क्रौञ्चस्वराभ: शुभ:।
येषां ते तुरगा: यतोऽर्थसुखदा: सौभाग्यराज्यप्रदा:
संग्रामे विजयं च तै: सह शुभं सैन्यं च संवर्धते।।
विच्छिन्नस्तनुरुक्षजर्जरखरक्षमास्तथा गद्गद:।
तुल्यो ध्वांक्षवराहजम्बुकखरोष्ट्राणां न शस्त: स्वर:।।

अश्वशास्त्रोक्तं गन्धलक्षणम्

एतद्ध्रेषितलक्षणं निगदितं गन्धोद्भवं वक्ष्यते।
स्रोत: स्वेदपुरीषमूत्रमुखजान् गन्धान्विदुर्वाजिनाम्।।
कमलकुसुमसर्पिश्चन्दनक्षीरगन्धा
दधिमधुकुटजानां चम्पकस्यन्दनानाम्।
अगरुगजमदानां तद्वदेवार्जुनानां
मधुसमयवनानां पुष्पितानां च गन्धा:।।
पुन्नागाशोकजातीसरसकुवलयोशीरपत्राम्रगन्धा:
पानीयप्रोक्षितोर्वी कुसुमितबकुलामोदिनो ये च वाहा:।
धन्या: पुण्या मनोज्ञा: सुतसुखधनदा भर्तुरानन्ददास्ते
माङ्गल्या: पूजनीया: प्रमुदितमनसो राजवाहास्तुरङ्गा:।।
श्वपचकमठगन्धा मत्कुणा: सृक्सगन्धा:
खरकरभवारोहोलूकविण्मूत्रगन्धा:।
मललशुनसगन्धा मत्स्यपित्ताण्डगन्धा
अशुभफलकरास्ते वर्जनीया हयानाम्।।

अश्वशास्त्रोक्तं छायालक्षणम्

मेघावली यथार्कं गगनस्थं छादयेत्तथा छाया।
छादयति सकललक्षणमश्वशरीरे समुद्भूता।।
सा छाया पञ्चविधा पृथ्वीजा वारुणी तथा सौरी।
वायव्या चैव भवेत्तुरगाणां नाभसी त्वपरा।।
स्निग्धा स्थिरा च महती वर्णैर्नानाविधैः सुगम्भीरा।
नयनमनोह्लादकरी प्रशस्यते पार्थिवी छाया।।
ससलिलजलधरतुल्या सरोरुहाभा प्रसन्नसलिलाभा।
स्निग्धा स्थिरा प्रशस्ता विज्ञेया वारुणी छाया।।
बालार्कविद्रुमाभा लाक्षारसपद्मरागकमलाभा।
आग्नेयी दीप्तिमती छाया शस्ता तुरङ्गाणाम्।।
परुषा भिन्ना दीना वायव्या निन्दिता छाया।
रुक्षा चपला तन्वी वायव्योक्ता नाभसी चेष्टा।।
तिस्रः श्रेष्ठाः पूर्वा अन्ये द्वे निन्दिते महामतिभिः।
तासां लक्षणमेतच्छुभाशुभं सम्प्रवक्ष्यामि।।

स्नातस्य पीतस्य तथाऽपराह्णे
सुप्तोत्थितस्यापि तुरङ्गमस्य।
भुक्तस्य नित्यं हयलक्षणज्ञैः
छायापरीक्षा तु शुभाशुभा वै।।

जयदत्तप्रोक्तं छायालक्षणम्

छाया वाजिशरीरेषु शुभाशुभनिवेदिनी।
वाजिनश्च प्रभोश्चैव तां ब्रवीम्यनुपूर्वशः।।
सुस्निग्धा पृथिवी छाया नानाद्युतिसमन्विता।
पद्मरागारुणा चैव आग्नेयी परिकीर्तिता।।
शुद्धस्फटिकसङ्काशा सुस्निग्धा चैव वारुणी।
रुक्षा दीना च वायव्या परुषा चैव निन्दिता।।

अश्वशास्त्रोक्तं गतिलक्षणम्

विभक्तैः पदविन्यासैर्नात्युच्चैर्ललितैः समैः।
चक्षुर्मनोह्लादकारी या गतिः सा शुभा मता।।

वक्रा स्खलिता विषमा बाह्यशफा भ्रष्टसौष्ठवा विकृता।
अतिविकटा सङ्कीर्णा गतिरत्यूर्ध्वा च न शस्ता।।

शिखिनकुलवृषोष्ट्रव्याघ्रसिंहनेभतुल्या
शरभगतिसमाना वानराणां च तुल्या।
मृगवरगतितुल्या सद्गतिर्यस्य सोऽश्वो
जयसुखविभवानां वर्धनः पार्थिवस्य।।

अश्वशास्त्रोक्तं सत्त्वलक्षणम्

त्रिविधं सत्त्वं शुद्धं राजसमथ तामसं ततस्तेषाम् ।
भेदास्तु सप्त षट् त्रय एवं हया अनेकशोऽभिहिताः।।

बाह्यं तथार्षमाहेन्द्रं याम्यकौबेरवारुणान्येव ।
शुद्धान्येतानि षट् तु गान्धर्वं सप्तमं चैव।।

आसुरराक्षसपैशाचसार्पपैत्राणि शाकुनं चैव।
षड्राजसानि नूनं त्रीण्येवात्र तामसानीति।।

पाशवमात्स्यवैरुधमेवं सत्त्वानि षोडशैवैतानि।
कथितान्युत्तममध्यमाधमानीति त्रिधा क्रमेणैव।।

कामापदेशतः स्मृतिमानकोपी स ब्रह्मसत्त्वः शुचिनिर्जितात्मा।
द्वेषो न रागो न मदो न मोहः स्याद्यस्य वै तं मुनिसत्त्वमाहुः।।

तेजस्विनः सर्वविभूतियुक्तमेवंविधव्यञ्जनमैन्द्रसत्त्वम्।
मायाविमुक्तं गतरागमोहं तं याम्यसत्त्वं मुनयो वदन्ति।।

प्रवक्तप्रसादकोपः कामी स्मृतिमान् कुबेरसत्त्वोऽश्वः।
ऐश्वर्यसौख्यस्मृतिशौर्यकेलिशीलो हरिर्वारुणसत्त्वसंस्थः।।

सङ्गीतवाद्यपूजाप्रियस्तु गन्धर्वसत्त्वोऽश्वः।
रौद्रः शूरश्चण्डो वाजी स्यादसुरसत्त्वस्तु।।

मेढ्रप्रहारी च महाशनश्च स्वापप्रियो राक्षससत्त्व एषः।
भीरुस्त्वशोच्यश्च महाशनश्च पैशाचसत्त्वश्च भवेत्तुरङ्गः।।
क्षिप्रप्रकुपितभीरुः शुचिर्हयो नागसत्त्वश्च।
दुःशीलः पितृसत्त्वः प्रियासनो दुरुपचर्यस्तु।।
सतताहारैर्मैथुनभूचापल्यैश्च शाकुनं सत्त्वम्।
क्षुज्जाड्यभयालस्यैः पाशवसत्त्वं विजानीयात्।।
आहारार्तो भीरुर्जलप्रियो मत्स्यसत्त्व इत्येषः।
निद्राध्यानालस्यैर्वीरुधसत्त्वं विजानीयात्।।

अश्वशास्त्रोक्तस्तालुरङ्गाध्यायः

महादोषाः समाख्यातास्तालुरङ्गमतः शृणु।
गर्भस्थस्य यदा पित्तं कुप्यते तालुके भृशम्।।
कृष्णतालुस्तदा वाहो जायते पापलक्षणः।
तालुरागोऽपि वाहानां शुभाशुभफलप्रदः।।
श्वेतं पीतं रक्तं श्यामं कृष्णं च चित्रमूर्धासितम्।
सप्तविधं जानीयात्तालुनि रागं तुरङ्गाणाम्।।
रक्तनिभः श्रेष्ठतमः शेषा रागाश्च नैव शस्यन्ते।
किञ्चिद्विशेषमेषां श्वेतादीनां प्रवक्ष्यामि।।
निर्वाणाङ्गारनिभं यस्य भवेत्तालु वाजिनस्तस्य।
भर्तुरचिरेण राज्यं राष्ट्रं विनाशमुपयाति।।
भर्तुर्वधोऽर्थकृष्णे तालुनि जाते सुतस्य जानीयात्।
ऊर्म्यन्तरिते कृष्णे पराजयं स्वामिनो विन्द्यात्।।
कृष्णोनातः क्षिप्तं मध्ये शुद्धं तु तालु यस्य स्यात्।
परिणद्धतालुरश्वो भर्तुः क्लेशवहो ह्येषः।।
कृष्णस्तु तालुवंशे पर्यन्तः पद्मपत्रसङ्काशः।
यस्याश्वस्य स नित्यं पराजयं स्वामिनः कुर्यात्।।

कृष्णैर्बिन्दुभिरथवा कल्माषैस्तालु चित्रितं यस्य।
कल्माषतालुरेष स्वामिनमशुभे नियोजयति।।
दीपाग्निबालएष स्वामिनमशुभे नियोजयति।।
दीपाग्निबालदिनकरपद्मदलाभं भवेद्वापि।
स्निग्धं तनुं गम्भीरं तालु शुभं वाजिनो ज्ञेयम्।।

उक्तं च शालिहोत्रेण—

समानवर्णं वर्णेन तालुकं यस्य दृश्यते।
न स तालुकदोषः स्यात् फलमल्पं च वक्ष्यते।।
सवर्णस्त्वथ दोषाय सकलः कृष्णतालुकः।।

अश्वशास्त्रोक्तः कुललक्षणाध्यायः

तालुरागाः समाख्याताः कुलानां लक्षणं श्रृणु।
हयाः काम्बोज-वाह्लीक-वनायुजकुलोद्भवाः।।
गान्धारकुलसम्भूतास्तथाऽरट्टकुलोद्भवाः।
वाहेयाः सैन्धवाश्चैव तैत्तिकाश्चैव वाजिनः।।
कुलजाश्चोपकुलजा मेचका ह्युपमेचकाः।
कैवर्ताश्चार्जुनीयाश्च पार्वतीयास्तथैव च।।
यौधेया यावनाश्चैव ये चान्ये ह्रस्वयावनाः।
तुषाराः काद्रवेयाश्च पार्वतीयास्तथैव च।।
आवन्त्याश्चापि काश्मीरा हया ये च सकाननाः।
पार्वत्योत्तरमाद्रेयाः दाक्षिणेयाः प्रकीर्तिताः।।
अन्तर्द्वीपोद्भवा वाहा कैकेयाम्बष्ठसंज्ञकाः।
वासन्तिकाश्च सौवीरा दारदा सैरिकास्तथा।।
कैराता क्षुद्रकैराता मालवा विन्ध्यकास्तथा।
कालिङ्गा माधुराश्चैव मानवाश्वास्तथैव च।।
कौशल्याश्चार्जुनेयाश्च तथोपावृत्तिका हयाः।
सौराष्ट्राश्चैव सौवीराः कौरवेयास्तथैव च।।

पाञ्चालाः पौण्ड्रकाश्चैव कुक्कुटा ह्रस्वकुक्कुटाः।
तथा हैमवता ये च ये चोक्ता मगधोद्भवाः।।
चतुःपञ्चाशदश्वानां कुलान्येतानि लक्षयेत्।
कुलानि नव चान्यानि घोटकानां विभावयेत्।।
अतस्ते संज्ञया योज्या न तु घोटगुणान्विताः।।
मत्ताविकाश्याश्मकेया मालिकाः श्वेतवाहनाः।
मेचका श्वेतगिरिजा वैदर्भा घोटकाः स्मृताः।।
पूर्वदक्षिणभागेन हिमवन्तं समाश्रिताः।
घोटकास्तेऽपि विज्ञेयाः श्यामा वा घोटकाः स्मृताः।।
अतः परं व्यञ्जनैस्तु प्रत्येकं सम्प्रवक्ष्यते।
यथोद्दिष्टाः कुलगणाः शृणु तांश्च पृथक्पृथक्।।

१. *काम्बोजाः*

काम्बोजाः सुमहाललाटजघनस्कन्धा महावक्षसो
दीर्घग्रीवमुखा महाजवयुता ह्रस्वाण्डमेढ्रासनाः।
श्रीमन्तः सुमहासमुद्रचरणा दीर्घैस्तु जातैर्भुजैः
सर्वव्यञ्जनपूजिता दृढशफा मण्डूकनेत्राश्च ये।।
श्वेताश्च शोणाश्च भवन्त्यदीना न कृष्णवर्णा न विवर्णितास्ते।
ह्रस्वैश्च कूर्चैर्मृदुरोमकेशाः ह्रस्वेन पृष्ठेन सुवर्णवन्तः।।
सुसंहिताङ्गाः प्रियदर्शनास्ते नित्यञ्च भर्तुर्वशगा मनोज्ञाः।
तेजस्विनः सारयुताः सुशीलाः श्रेयःस्वरूपेण कुलेन दृप्ताः।।
समवृत्तजानुजङ्घा वृत्ताङ्गा ह्रस्वकुष्ठिकरखुराश्च।
पीनास्तनुलाङ्गूलाः स्थूलाक्षाः शङ्कुकर्णाश्च।।
सुमहासृक्वप्रोथा महोदरास्ते महातनुश्वासाः।
प्रत्यक्षं वडवामपि दृष्ट्वा न ये प्रह्रेषन्ते।।
ऊर्ध्वमुखाः स्थिरपादाः शुभरोमाणः सुपार्श्वाश्च।
शूराः सुखसञ्चाराः काम्बोजास्ते समाख्याताः।।

२. *वाह्लीकाः*

वाह्लीकाः काम्बोजैः समानसंस्थानवर्णरूपाश्च।
तेषामयं विशेषो दीर्घोदरपृष्ठवंशास्ते।।
परिणाहायामाभ्यामधिकाः किञ्चिन्महेक्षणाः शूराः ।
हृत्पृष्ठमूर्तिदीर्घा दीर्घग्रीवा दशनकेशाश्च।।
मधुपिङ्गलाभनयना क्रुद्धास्ते दन्तखादिनः कथिताः।
भर्तुश्च वत्सलाः स्युर्महाजवा रूपसौन्दर्यसम्पन्नाः।।

३. *वनायुजाः*

वनायुजाश्च लघवः प्रचण्डमध्यप्रमाणाश्चपला न दीनाः।
वृत्तायताः कायसमाः सुनेत्राः ह्रस्वाण्डमेढ्रास्त्वथ शङ्कुकर्णाः।।
पूर्वार्धकायेषु समुच्छ्रितास्ते ह्रस्वास्त्रिके भारसहाः सुसत्त्वाः।
स्थूलैश्च पादैर्दृढकुष्ठिकाश्च कालानुवर्णा बहुशो भवन्ति।।
अपाङ्गदेशे विकटाः सुदीर्घा मेघेभनादेषु न शङ्किनस्ते।
क्षान्ता मृगेन्द्रा इव ते विभान्ति दर्पोज्ज्वला वह्निसमानरूपाः।।
रथे योक्तुं न शक्यन्ते न सहन्ते च यन्त्रणाम्।
स्नायुसंयुतगात्राश्च सर्वेभ्योऽप्यधिका जवात्।।
वन्यपर्वतदुर्गाणां मध्ये नेच्छन्ति धावितुम्।
मयूरसदृशग्रीवाः सुवर्णसदृशाश्च ये।।

४. *गान्धाराः*

गान्धारा बहुवर्णाः शरीरवन्तः सुसंस्थिता बलिनः।
दृप्तोदयाश्च पुरतः पश्चाद्विषमाश्च दीर्घाश्च।।

५. *आरट्टजाः*

आरट्टजाः सुजघना अदीर्घपृष्ठाः सुकुष्ठिका बलिनः।
स्थूलाक्षिकूटशङ्खास्तेजोजवसारयुक्ताः स्युः।।

६. *सैन्धवाः*

सैन्धवकुलजा बलिनो दृढजत्रुमहोरसो महाप्रोथाः।
तनुसृक्वत्वग्गोला विलम्बमुष्काः समेढ्राश्च।।

७. तैत्तिजाः

दीर्घग्रीवामुखाः स्युः स्थूलाक्षास्ते महाकायाः।
तैत्तिजकुलजा जविनः स्थूलहनुग्रीवमेढ्रमुष्काः स्युः।।

८. *कुलजाः*

पृथुवक्षोजघनाक्षा भाराध्वसहाः सुगात्राश्च।
कुलजा वृत्तग्रीवा आयतवक्राश्च दीर्घवालाश्च।।

९. *उपकुलजाः*

तनुरोमत्वक्केशाः सुवृत्तमध्योरुकुष्ठिकाख्याताः।
उपकुलजाः कुलजानां समलिङ्गा किञ्चिदायतशरीराः।।

१०. *मेचकाः*

अल्पगतयोऽल्पसत्त्वा भारसहाः कर्बुराश्चैते।
मेचककुलजा वाहा दीर्घग्रीवा महोरसस्तुङ्गाः।।
स्पष्टमुखवल्गुवर्णा मध्यबलाः शङ्कुकर्णाश्च।
तनुभिर्गात्रैर्ह्रस्वैः कूर्चैश्च खुरैश्च विपुलजघनाः स्युः।।

११. *उपमेचकाः*

विस्तीर्णकाकसाः स्युर्न कर्कशा मध्यमेढ्रास्ते।
उपमेचकाः स्युरुच्चैर्बद्धशिरोग्रीवदुर्धरैः केशैः।।

१२. *त्रैगर्ताः*

मृद्वङ्गा वल्गुसटाः सुकुष्ठिका दुर्मुखास्तुरगाः।
त्रैगर्ताः शशिवदनाः शशिवालाधिकेसराः शशिप्रोथाः।।

१३. *यौधेयाः*

दृढपादा अक्रूराः शशिवर्णाः प्रायशस्तेऽश्वाः।
यौधेया भारसहा सुखुरा वृत्तायतघनग्रीवाः।।

१४. *सावित्रेयाः*

स्पष्टायतवदनाः स्युश्चण्डास्तनुसूक्ष्मरोमाणः।
सावित्रेयास्तुरगा घासग्रासान्विताः शूराः।।

मृद्वङ्गाः पृथुपादा महोदराः सुप्रसन्नाश्च।
शस्तोरुपृष्ठदीर्घाः स्थिरमांसा दीर्घकेशवालाश्च।।

१५. *यवनाः*

चारुनयनकपोलास्तु हनुवक्रास्तुरङ्गमाः शस्ताः।
यवनास्तुरगा विपुलाः पृथुघनवक्षोललाटनयनाः स्युः।।
दीर्घाः सुकुष्ठिकाः सुखुरा लघुक्रमाः शस्ताः।
प्रियदर्शनाः सुवर्णाः स्पष्टायततनुमहाकायाः।
तेजःसत्त्वोपेतास्तनुत्वचश्चापि सूक्ष्मरोमाणः।।

१६. *तर्जिता*

द्वीपे समुद्रस्य चरन्ति वाहाः सन्तर्जिता ये मधुना तु पूर्वम्।
तीर्त्वा समुद्रं यवने तु देशे तुरङ्गमाणां जनयन्ति पुत्रान्।।
तेजस्विनस्तर्जितसंज्ञिकाश्च तत्तुल्यरूपाः सुमहाजवाः स्युः।
ज्ञेयाः प्रकृत्या निजया सपित्तास्तेभ्योऽपि जातास्तुरगाः सुरूपाः।।

१७. *अर्जुनाश्वाः*

ते स्युश्चार्जुनजा वाहाः पृथूदराः प्रलम्बमुष्काश्च।
शुचिसमवक्रस्कन्धग्रीवाश्च ह्रस्वपृष्ठाः स्युः।।

१८. *ह्रस्वयवनाः*

त एव ह्रस्वा यवनसंज्ञास्त्वन्ये हयाः प्रोक्ताः।
ह्रस्वाङ्गाः शुभगात्राः शुभसाराः शुभजवाश्चापि।
शुभरोमवालकेशाः सुभगाः सुमेढ्रकाः सुरूपाश्च।।

१९. *काद्रवेयाः*

पृथुजघनदृढपादा सुकुष्ठिकाः शुभखुरास्तुरङ्गाः।
अश्वास्तु काद्रवेया दृढपादाः सूक्ष्मवालरोमाणः।।

२०. *तुषाराः*

प्रियदर्शना मनोज्ञास्तेजोजवसत्त्वसंयुक्ताः।
एवं तुषारकाश्वा जवसत्त्वबलान्विता महाकायाः।।

भाराध्वक्लेशसहाः स्वेच्छाचाराः पृथूदरोरस्काः।
दृढमेधसः सुशीला बलवन्तस्ते मनस्विनश्चित्राः।।

२१. *पार्वतीयाः*

स्थूलत्वचः सुशीलाः सुकुष्ठिकाः कायवर्तुलाश्चैव।
अश्वास्तु पार्वतीयाः पूर्वशरीरेषु संस्थितास्ते स्युः।।

२२. *आवन्त्याः*

पश्चार्थेषु च विषमास्तनूदरा ह्रस्वपृष्ठाश्च।
आवन्त्याः स्थूलाङ्गाः पृथुवक्षोजघनसूक्ष्मरोमाणः।।

२३. *काश्मीराः*

औरस्याः पृथुजङ्घा दृढपादा महोदरोरस्काः।
काश्मीराः शुद्धाक्षा विपुलसटाः सुसंहताः सुखुराः।।

२४. *काननाः*

स्पष्टायततनुवक्रास्तुरगास्तु शङ्कुकर्णास्ते ।
अश्वास्तु कानना वै शुभाननास्ते पुनः समुद्दिष्टाः ।।
पूर्वार्धे स्युरुदग्राः पश्चार्थे चोद्यता जविनः ।
ह्रेषन्ते प्रत्यक्षं दृष्ट्वा वडवां च शङ्कुकर्णास्ते ।।

२५. *उष्ट्राः*

मृदुदीर्घा उद्ग्रीवा उष्ट्राख्या उष्ट्रगात्रवक्राः स्युः ।

२६. *पार्वतीयाः*

वाहास्तु पार्वतीया बलान्विताः स्निग्धकेशाश्च।
वृत्तास्ते दृढपादा महाजवाश्चेति विख्याताः।।
आजानेयास्त्वेवं कथितानि कुलानि वै पृथक्त्वेन।
षड्विंशतिरश्वानां च विशेषं वक्ष्यते त्वधुना।।
आजानेयास्तुरङ्गा दृढचरणयुता वर्ष्मवन्तः सुनेत्रा
भूयिष्ठं वर्णयुक्ताः प्रकृतिगतिगुणैरर्चिता ह्रस्वमुष्काः।
संग्रामे भर्तृवश्याः प्रबलजवयुताः शुद्धसत्त्वाः सुशीला
आयुष्मन्तोऽल्परोगा मृदुतनुसुमहादीर्घनिर्मांसवक्राः।।

सुविभक्तोपचिताङ्गाः सुसंहता ह्रस्वपृष्ठखुरकर्णाः।
बलतेजःसारयुता जितेन्द्रियाः क्षुत्पिपासभारसहाः।।
शुभकायाः शुभरूपाः शुभगन्धाः शुभस्वराः शुभस्थास्ते।
शुभलक्षणाश्च सुभगा न कर्कशास्ते जितक्रोधाः।।
निशितास्त्रभिन्नकायाः संज्ञां न जानन्ति विह्वलास्तस्मात्।
आजानेयवाहास्तस्मादेते समुद्दिष्टाः।।
एते विभिन्नदेहा विनिर्गतान्त्रा गताश्च मृत्युवशम्।
यावत्पृष्ठे भर्ता तावत्प्राणान्न मुञ्चन्ति।।
विस्तरभयान्न चोक्तं कुलजानां लक्षणं हि शेषाणाम्।

उक्तं च शालिहोत्रेण—

तत्र काम्भोजानामुपकुलं वनायुजमारट्टजं वाह्लीकाश्च।
वनायुजानामुपकुलं गान्धारा आरट्टजानां वाहेयाः सैन्धवानां तैत्तिराः।।

अश्वशास्त्रोक्तं वयोज्ञानम्

कुलानां लक्षणं प्रोक्तं वयसो ज्ञानमुच्यते।
वयो ज्ञानविदो लोके यस्मात् सर्वजनप्रियाः।।
वयसो ज्ञानं द्विविधं बाह्यं चाभ्यन्तरं समुद्दिष्टम्।
बाह्यं बहिःशरीरजमाभ्यन्तरमपि देहदशनस्थम्।।

प्रथमवयोनिःश्रेणी

प्रथमे च मासि सन्दंशः किञ्चिदुद्गतैर्ज्ञेयः।
व्यक्तैश्च तैर्द्विमासः षट्पक्षो मध्यमैर्जातैः।।
पूर्णैर्मध्यमदशनैः सन्दंशैश्चैव पञ्चमे मासि।
लक्ष्यालक्ष्या सुसूक्ष्मा राजीधूम्रारुणा तु सन्दंशैः।।
स्यात्पूर्णाग्रैर्दन्तैः स तु चाल्पषाण्मासिको वाजी।
प्रोद्भिन्नैरनुभूतैर्विज्ञेयः साप्तमासिको विज्ञैः।।
सन्दंशाभ्यां तुरगः शुक्लाभ्यामष्टमासिको ज्ञेयः।
ज्ञेयश्च शिशुर्नवमे सम्पूर्णैः पारिभक्षैश्च।।

द्वितीयादिपञ्चमान्तवयोनि:श्रेणी

सितदशनः प्रथमेऽब्दे कषायदशनश्च भवेद्द्वितीये तु।
पतितोत्थितैश्च दशनैस्त्रिहायनः कीर्तितस्तुरगः।।
मध्यमदशनैः पतितैरुद्भूतैः स्याच्चतुःसमो वाजी।
पञ्चाधिकस्तु कथितश्च्युतोत्थितैः पारिभक्षैश्च।।
तस्मिन्काले वाजी पतितोत्थितदन्तचक्रो बलवान्।
स्निग्धाज्यवर्णदशनैर्वश्यः सर्वाङ्गसम्पूर्णः।।
पूर्णफलो दंष्ट्रवान् प्रसन्नमुदितेन्द्रियः सुरोमा च।
पञ्चसमो भवति हयस्तेजस्वी सर्वकर्मसहः।।
ह्रस्वास्तनवश्च समाः पृथ्वग्रा क्षीरसन्निभाश्चैव।
सरलाः सुसंज्ञिता वै दन्ताः कैशोरका ज्ञेयाः।
श्वेताश्च दीर्घाश्च सुसंहताश्च तीक्ष्णाग्रसंस्था विपुला दृढाश्च।
मध्ये विभक्तास्त्वथ मूर्ध्नि निम्नाश्च्युतोत्थितास्ते दशनाः प्रदिष्टाः।।

व्यञ्जनलक्षणम्

प्रथमेऽब्दे सन्दंशे द्वित्रिसमे मध्यमान्तेषु।
व्यञ्जनमश्वेषु भवेत् षष्ठादारभ्य दशनेषु।।
कृष्णा हरिणी शुक्ला पीता काचा च मक्षिका चैव।
शङ्खच्छिद्रं चलनं व्यञ्जनमेतत्क्रमेण विज्ञेयम्।।
अवृद्धा वृद्धरूपाश्च वृद्धास्तरुणसंस्थिताः।
दृश्यन्ते वाजिनः केचित्सम्मोहनकरा भृशम्।।
वयः परीक्षेत्खुररोमदन्तचेष्टाबलौजोवचनादियोगैः।
संस्थानविण्मूत्रसमर्थनाभिरश्वस्य तज्ज्ञैरपरैश्च लिङ्गैः।।
रेखाऽऽयता तिर्यगरिष्टवर्णा कृष्णा भवेत्षट्पदसन्निभा वा।
तन्त्री सवर्णा हरिणी प्रदिष्टा शुक्ला दधिक्षीरसमानवर्णा।।
सितासिद्धार्थकवर्णा काचा किञ्चित्तु कोद्रवसवर्णा।
या मक्षिकासवर्णा ज्ञेया सा मक्षिका निपुणैः।।

शङ्खं शङ्खदलोपमामुलूखलं दन्तमध्यजच्छिद्रम्।
विन्द्याच्चलितैश्चलनं दन्तैः पतनं तु पतितैश्च।।
एवं कृष्णा हरिणी शुक्ला काचा च मक्षिका चैव।
शङ्खोलूखलचलनं भ्रंशश्चैषां क्रमः कथितः।।

षष्ठादिद्वात्रिंशान्तवयोनिःश्रेणी

षष्ठेऽब्दे सन्दंशे मध्यमदशनेषु षड्गवे वर्षे।
कृष्णाष्टमे तु वर्षे विज्ञेया पारिभक्षेषु।।
हरिणी नवमे दशमे वर्षे चैकादशे तु दशनेषु।
सन्दंशमध्यमान्त्ये वाजिनमालक्षयेन्मतिमान्।।
एवं सिता द्वादशके तु वर्षे त्रयोदशे चैव चतुर्दशे च।
सन्दंशमध्यान्त्यमुखोद्भवेषु समुत्थितां विद्धि तुरङ्गमस्य।।
काचा पञ्चदशे वै षोडशके तदुत्तरे च वाहानाम्।
अग्रिममध्यमदशनेष्वथ पारिभक्षेषु चादेश्या।।
अष्टादशके चैकोनविंशतिसंज्ञिके च विंशतिभे।
सन्दंशमध्यान्त्येष्वथ वाजिनां मक्षिका कथिता।।
एवं क्रमेण शङ्खं छिद्रं चलनं पतनं तदेषु।
त्रीणि त्रीण्यब्दानि तु वाहानां निर्दिशेत्प्राज्ञः।।

व्यञ्जनक्रमेण संस्थानलक्षणम्

दृष्टः सम्पूर्णमांसः समुदितगजवन्मेघनादः क्षमावां-
स्तेजस्वी सत्त्वयुक्तः परमबलजवः सर्वसम्पूर्णकायः।
क्षुत्तृड्भाराध्वशीतातपपवनसहः सुप्रसन्नेन्द्रियात्मा
चैभिर्लिङ्गैरुपेतो भवति गतवयाः कालिकाव्यञ्जनोऽश्वः।।
स्थिरमांसस्तेजस्वी बलवान् क्षुत्तृट्सहः सततम्।
रूपयुतो घननादः स तु हरिणीव्यञ्जनो वाजी।।
बलजवतेजोरूपैः प्रहीयमानोऽनुमस्तके वलिभिः।
वाहं ललाटपलितं शुक्लाख्ये व्यञ्जने विन्द्यात्।।

परितवलीकर्णाङ्गो विशीर्णदन्तश्च गतबलोत्साहः।
दु:खी कुञ्चितनेत्रो भवति च मक्षिकाव्यञ्जनो वाजी।।
गम्भीराक्षो दीनः स्याच्छङ्ख्वव्यञ्जनो विगतमांसः।
हर्षक्रोधविमुक्तः समुद्गतोलूखलो वाहः।।
मन्दं यवसं खादन् स्याच्चलितवक्त्रजो वाजी।
दन्तैः पतितैर्वाजी आयुर्द्वात्रिंशकः कथितः।।
गर्गेणोक्तं तु गजे यथा शतं विंशतिश्च पुंसि शतम्।
परमायुः कथितमिदं तद्वद्द्वात्रिंशदश्वेषु।।
चरतो मन्दुराश्वस्य लवसारसमाश्रयात्।
क्षयवृद्धिगतीर्ज्ञात्वा ततो व्यञ्जनमादिशेत्।।

प्लवादिविशेषलक्षणम्

च्युतोत्थिता द्विजा ये तु भान्ति कैशोरका इव।
ते प्लवाः येष्वथोद्भूतं व्यञ्जनं लघु दृश्यते।।
सारदन्ताः स्थिताः श्वेताः घनास्तीक्ष्णास्तु संस्थिताः।
क्रमात्तेषु क्षयं याति व्यञ्जनं परिसंस्थितम्।।
यान्येव सारदन्तस्य चरतो मन्दुराश्रये।
त्रीणि वर्षाणि चाप्येवं दंशेष्वेषु विनिर्दिशेत्।।
एवमेव तु ''चारक्याः'' सारदन्ताः प्रकीर्तिताः।
चारक्यदन्तो विज्ञेयश्चतुर्थे कालिकोद्भवः।।
सप्तमे हरिणी तस्य सन्दंशाश्रयणी भवेत्।।

आयुःसिद्धान्तः

उक्तं च शालिहोत्रेण—

यथा नरे वर्षशतं विंशतिश्च शतं गजे।
गवां चतुर्विंशतिश्च खरोष्ट्रौ पञ्चविंशतिः।।
शुनि षोडशवर्षाणि श्रृगाले पञ्चविंशतिः।
कृमयः सप्त चाहानि मक्षिका च चतुर्दश।।
तथा हयेषु द्वात्रिंशत्समा आयुर्विधीयते।।

अश्वशास्त्रोक्तं वर्णलक्षणम्

कथितं तु वयोज्ञानं वर्णानां लक्षणं श्रृणु।
श्वेतः शोणः कृष्णः हरितो वर्णा भवन्ति चत्वारः।
त्रिस्तथा पञ्चमकस्त्वेते वर्णप्रकाराः पञ्चैव।।

वर्णपरिज्ञानम्

ज्ञेयः समानवर्णस्त्वेककेसररोमवालैश्च।
हीरक्षीरशशाङ्कशङ्खरजतप्रालेयवर्णाः सिताः।।
आर्द्रालक्तकदाडिमीकुसुमवद्रक्ताश्च शोणाः स्मृताः।
कृष्णास्त्वञ्जनकोकिलाम्बुदनिभा भङ्गाङ्गनागोपमा
हेमाभा हरयः प्रदीप्तहुतभुग्गोरोचनासन्निभाः।।
एते शुद्धा वर्णा अनुवर्णाश्चैव वर्णभेदाश्च।
चित्रा ताराश्चैषां संयोगेनोपजायन्ते।।

अनुवर्णपरिज्ञानम्

तत्र त्वेको वर्णः पूर्वं पश्चाद्भवेत्परो यस्य।
अनुवर्णं तं विन्द्याद्भेदं सर्वैर्विमिश्रितं वर्णैः।।

सारोऽश्वः

एकद्वित्रिसवर्णैर्विचित्रितो बिन्दुभिः सचित्रस्तु।
श्वेतोऽन्यवर्णमण्डलयुक्तः 'सारः' स तु समाख्यातः।।

कर्कोऽश्वः

त्वग्नेत्रवर्ष्ममेहनमेढ्राश्रयमुष्कखुरगुदप्रोथैः।
पद्मोपमैस्तु कर्कः सितकेसरतनुजवालैश्च।।
ताम्रस्य तालुमुष्कौ मधूककुसुमप्रभौ तथा कर्कः।
ताम्रत्वक्शुद्धाक्षस्त्वन्ये केचिद्वदन्त्येवम्।।

कुक्कुटोऽश्वः

कर्कस्य यस्य जठरासननासाक्षिवक्त्रदशनाश्च।
निचिताः कृष्णैर्बिन्दुभिरथवा रक्तैस्स कुक्कुटः प्रोक्तः।।

क्रौञ्चपत्रोऽश्व:

सितारोमवालकेश: कृष्णात्वग्गुह्यलोचनौष्ठखुर: ।
एष तु मुनिभिर्वाहो निर्दिष्ट: क्रौञ्चपत्रश्च ।।

सिन्धुवारकोऽश्व:

त्वग्रोमवालकेसरगुह्याक्षिखुरैश्च सिन्धुवारनिभै: ।
योऽश्व: स सिन्धुवारकनामा मुनिभि: समुद्दिष्ट: ।।

सिंहनोऽश्व:

ताम्रा त्वक् संरक्तौ मुष्कौ वदनं च सिह्यरोमा य: ।
वालै: केशैश्च सितै: सिंहन: स हय: समाख्यात: ।।

वृषगौरोऽश्व:

रक्तोत्पलपीतयुक्तस्ताम्रत्वक्चैव संस्थितो गौर: ।
शुक्लोऽपि कृष्णयुक्त: स तु वृषगौर: समुद्दिष्ट: ।।

मुञ्जकेशोऽश्व:

यस्यान्यवर्णस्य हि शुक्लवर्णा: केशो भवन्तीह स मुञ्जकेश: ।

अञ्जनकेशोऽश्व:

यस्यान्यवर्णस्य तु कृष्णवर्णा: केशा: स वै अञ्जनकेशकोऽश्व: ।

मिश्रकेशोऽश्व:

यो बहुवर्णै: केशैर्युक्त: स मिश्रकेशक: कथित: ।
बहुविधवर्णैर्वालै: स प्रोक्तो मिश्रवालकश्चैव ।।

शोणोऽश्व:

कृष्णाक्षिगुह्यकेसरत्वग्वालखुरास्तुरङ्गमा: शोणा: ।।

शोणानुवर्ण्यश्व:

शोणानुवर्णिनो वा विज्ञेया: कालवालैस्तु ।

शुक्लरोमकोऽश्व:

रक्तोऽल्पकृष्णरोमा रक्तखुरो रक्तवालस्तु ।
कृष्णनयनस्तु वाजी सोऽप्युक्त: शुक्लरोमक: प्राज्ञै: ।।

कालरोमकोऽश्वः

कृष्णाधिकस्त्वगादौ स संज्ञितः कालरोमको निपुणैः ।।

कालाक्षिकोऽश्वः

ते चापि बहुलकृष्णाः कालाक्षिकसंज्ञिताः स्मृता वाहाः ।

मृदुरोमकोऽश्वः

सिक्तरक्तासितचर्मा सोऽश्वो मृदुरोमकः कथितः ।

श्वेताक्षिकोऽश्वः

बहुशुक्लाः श्वेताक्षिकनामानो वाजिनः कथिताः ।।

पाटलोऽश्वः

सितरक्तासिततनुजैर्यः कृष्णो बालकेशखुरनयनैः ।

कृष्णत्वक्चैव भवेत् स ऋष्यकः पाटलो नाम ।।

कृष्णत्वक्सितरक्तैस्तनूरुहैः पाटलो हयः प्रोक्तः ।।

सुमनपटलोऽश्वः

शुक्लैः स एव बहुभिः स्यात्सुमनः पाटलो वाजी ।

रक्तपाटलोऽश्वः

बहुभिः शोणैस्तनुजैरल्पसितै रक्तपाटलो वाजी ।

चक्रवाकोऽश्वः

पीतैर्वालैर्वाजी सोऽप्युक्तश्चक्रवाकसंज्ञकश्च ।

सिद्धार्थकोऽश्वः

तनुजैर्गौरैः पीतैर्वाहः सिद्धार्थकः प्रोक्तः ।

कपिलोऽश्वः

रक्तैः पीतैरेतैर्युक्तः कपिलो भवेद्यस्तु ।।

धूम्रवर्णोऽश्वः

असिताल्पयुतः शोणस्तु धूम्रवर्ण इति कथ्यते वाजी ।

खञ्जरीट्यश्वः

श्वेतैः पीतैरसितैर्वालत्वङ्मिश्रकेसरो यस्तु ।

ज्ञेयः स खञ्जरीटी पीतश्वेतोत्तरो वाहः ।।

करण्टकोऽश्वः

सितरक्तपीतरोमा रक्तत्वग्यः करण्टकः सोऽश्वः ।

कर्बुरोऽश्वः

हंसग्रीवसवर्णो रक्तत्वक् कर्बुरो ज्ञेयः ।

श्वेताश्वस्य वैशिष्ट्यम्

सर्वैर्वर्णैः शस्तास्तुरगाः सप्रभाः स्थिराः स्निग्धाः ।
तेषां श्वेतः श्रेष्ठो यतो ध्रुवश्चाव्ययश्चासौ ।।
सर्वेषां वर्णानां संयोगः श्वेतसंयुक्तः शस्तः ।
यस्मात्कृतेऽपि शुक्लस्तस्माच्छ्वेतः प्रधानतरः ।।
किं बहुना येनोक्तास्तत्र हयास्तु वर्णनामभिः केचित् ।
द्रव्यस्य यस्य सदृशास्तन्नामानस्तुरङ्गमा ज्ञेयाः ।।

देववाहानां वर्णविशेषाः

सर्वश्वेताः शशिनो हरयः कनकप्रभाः सुरेन्द्रस्य ।
कृष्णा यमस्य वाहाः कर्काः शुभलक्षणा विष्णोः ।।
कनकपत्रनिभा भानोः किंशुकवर्णा हया हुताशस्य ।
असिताभ्रनिभा वरुणस्य कुबेरस्य तु कुमुदनिभास्तुरङ्गमाः ।।
एभिर्वर्णैरश्वाः शुभस्वरावर्तकायरूपाश्च ।।

अश्वशास्त्रोक्त आयुर्लक्षणाध्यायः

आयुर्लक्षणमश्वानामत ऊर्ध्वं प्रवक्ष्यते ।
शालिहोत्रादिभिः प्रोक्ते यथापूर्वं तपोधनैः ।।
सुमहान्तश्च ये वाहा ह्रस्वकर्णास्तथैव च ।
स्वरनेत्रस्वभावेषु न दीनाश्चिरजीविनः ।।
महाघोणा महाकाया ये चाश्वाः पृथुवक्षसः ।
तेषां दीर्घं भवेच्चायुः स्निग्धाङ्गाश्चैव ये सदा ।।
कर्णाग्रे पीडिते येषां सिन्दूराभं यस्य दर्शनम् ।
शोणितस्य भवेत्क्षिप्रं ते मताश्चिरजीविनः ।।
नभो जिघ्रन्ति ये चापि तेऽपि दीर्घायुषो मताः।
विनिष्किरन्ति ये ग्रासं स्वग्रासाय तुरङ्गमाः ।।

कुष्ठिकायां किणा येषां दृश्यन्ते वाजिनां स्फुटाः ।
प्रशस्तं च भवेद्वक्षो येषां ते दीर्घजीविनः ।।
पद्मपत्रदलाकारं जिह्वाग्रे यदि वाजिनः ।
दन्ताश्च मौक्तिकाकाराः लिङ्गं येषां च निर्मलम् ।।
सीत्काश्च भवेद्येषां लाङ्गूले चलनं पुनः ।
प्रस्वेदः शुभगन्धस्तु नखा वै दर्पणोपमाः ।।
येषां च दीर्घमानं ह वै ते सर्वे चिरजीविनः ।
स्निग्धगम्भीरदीर्घाश्च प्रोथजा यस्य वाजिनः ।।
भवन्ति विपुला रेखास्तं विन्द्याद् दीर्घजीविनम् ।
छत्रचामरभृङ्गारखड्गाङ्कुशनिभास्तथा ।।
शक्तिवज्रगदाकारा ध्वजादिसदृशास्तथा ।
उर्ध्वप्रोथस्थिता रेखा यस्य वामेन चानताः ।।
ह्रस्वा वा यस्य वाहस्य न चिरं तस्य जीवितम् ।
श्रीवृक्षस्वस्तिकाम्नाताः प्रोथै रेखाश्चिरायुषम् ।।
ऊर्ध्वप्रोथे समा रेखा दृश्यन्ते यस्य वाजिनः ।
तस्य मृत्युः समुद्दिष्टो दशमं प्राप्य वत्सरम् ।।
अङ्गुलाभं दश द्वे च वर्षाणां तस्य जीवितम् ।
त्रयोदश स जीवेत्तु यस्य स्युश्चतुरङ्गुलाः ।।
तिर्यगेवोर्ध्वगे चैव द्वे रेखे यस्य वाजिनः ।
प्रोथजे यस्य वाहं तं विन्द्यादेवं चतुर्दश ।।
दक्षिणेन च पार्श्वेण यः शेते सर्वदा हयः ।
बहुमूत्रा अल्पमूत्राश्च ते चिरजीविनो हयाः ।।
विनतः पूर्वकायेन स्थले जान्वोश्च यो हयः ।
सूनाक्षकूटस्तन्द्राक्षः स्वल्पायुः स प्रकीर्तितः ।।

।। इस प्रकार 'नकुलकृत अश्वशास्त्रोक्त' अश्वमेधीय एवं सामान्य अश्व का अंग-विभाग-लक्षण-विमर्श समाप्त हुआ।।

अष्टम परिच्छेद

काल एवं दक्षिणा-निरूपणाध्याय

कलियुग में अश्वमेध-निषेध-कारण-विचार

पुराण वाङ्मय एवं स्मृतिग्रन्थों में ऐसे अनेक विहित कर्मों का संग्रह प्राप्त है, जिनका कलियुग में निषेध किया गया है।[1] आचार्य कमलाकरभट्ट ने अपने कलिवर्ज्य संग्रह में अश्वमेध का भी उल्लेख किया है—

दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ ।

इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः ।।

यहाँ यह प्रश्न है कि इस निषेध का कारण क्या है?

सर्वप्रथम यह मननीय है कि किसी भी अल्पकालिक या दीर्घकालिक योजना अथवा महायोजना की सफलता या असफलता का रहस्य क्या है? जैसा कि निरूपित है कि मीमांसा के अनुसार "कर्ता" "कार्य" या "उपकरण" इन तीनों में अन्यतम किसी के भी साद्‌गुण्य अथवा वैगुण्य से फलगत साद्‌गुण्य या वैगुण्य होगा। आचार्य जैमिनि ने स्पष्ट कहा है—**'न कर्मकर्तृकारणवैगुण्यात्'**[2] इस तथ्य को अल्प शब्दान्तर से इस प्रकार कहा जा सकता है—**"कारणगुणात्मकत्वं कार्यस्य"**। पूर्वतथ्य के उदाहरण में यह कहा जा सकता है कि यदि कपाल संयोग ठीक नहीं होगा, तो घटोत्पत्ति बाधित होगी अथवा सच्छिद्र कपाल से निश्छिद्र घटोत्पत्ति बाधित है। द्वितीय तथ्य के उदाहरण में

---

१. (क) बृहन्नारदीयोक्तकलिवर्ज्यानि—"दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ।"
द्र०, निर्णयसिन्धोः तृतीयपरिच्छेदः, "कलिवर्ज्यप्रकरणम्"।

(ख) हेमाद्रौ ब्राह्मे गरुडपुराणे च—"नराश्वमेधो मखं च कलौ वर्ज्यं द्विजातिभिः।"
द्र०, निर्णयसिन्धोः तृतीयपरिच्छेदः, कलिवर्ज्यप्रकरणम्।

(ग) "दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ।
इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः"।।
द्र० निर्णयसिन्धोस्तृतीयपरिच्छेदः, कलिवर्ज्यप्रकरणम्।

(घ) द्र०, ना०पु० २४.१३-१६।

२. द्र०, जै०सू०।

यह स्पष्ट है कि रक्ततन्तु से रक्तवस्त्र ही उत्पन्न होगा। दुर्बल तन्तुओं के संयोग से पुष्पपटोत्पत्ति बाधित है। प्रकृत में भी उपर्युक्त कार्य-कारणभाव मन्तव्य है। अश्वमेधनिष्ठकार्यतानिरूपित कारणता, कर्तृनिष्ठा, कर्मनिष्ठा, उपकरणनिष्ठा भी है। अर्थात् एतत्त्रितयसमुदायनिष्ठा है। चक्रचीवरन्यायानुसार "**करणसमावायात् कार्योत्पत्तिः**" इस सिद्धान्त के अनुसार अश्वमेधकर्ता, अश्वमेधयागीय उपकरण एवं अश्वमेधयागकर्म—इन तीनों की वैधता पर ही अश्वमेध महायज्ञरूपी महायोजना की सफलता निर्भर है। अन्यथा यह अफल-विफल हो सकता है।

अश्वमेधकर्ता की वैधता

अभिषिक्त क्षत्रिय राजवंशोत्पन्न सम्राट् अश्वमेध का सर्वप्रथम अधिकारी है, जिनके द्वारा जन्म प्रकृति आनुवंशिक उत्तरदायित्वपूर्ण विश्वस्तरीय मानव सेवाव्रत का पालन अपेक्षित है। इस प्रकार के गुणविशिष्ट–लक्षणविशिष्ट उत्तम अधिकारी प्राय: प्रसिद्ध सूर्यवंश एवं चन्द्रवंश में होते आए हैं। इन दोनों प्रसिद्ध अभिषिक्त क्षत्रियराजवंशों को ऐसे अनेक सम्राट् उत्पन्न करने का श्रेय प्राप्त है, जिनके द्वारा न केवल आनुवंशिक जन्मप्रभृति उत्तरदायित्वपूर्ण मानवता की रक्षा हुई है; अपितु ऐतिहासिक अद्भुत कीर्तिमान् भी स्थापित हुए हैं। सम्प्रति यह वंश लुप्त है। महाभारत काल में सूर्यवंशी राजा बृहद्बल[१] थे, जिन्होंने महाभारत युद्ध में दुर्योधन का पक्ष लेकर युद्ध किया एवं अभिमन्यु के हाथों वीरगति को प्राप्त किया था।[२] महर्षि व्यास के अनुसार—

इक्ष्वाकूणामयं वंशः सुमित्रान्तो भविष्यति।
यतस्तं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ[३]।।

चन्द्रवंश में सम्राट् युधिष्ठिर ने सांगोपांग अश्वमेध का अनुष्ठान किया था। तत्पश्चात् उनके पौत्र परीक्षित ने इस परम्परा का निर्वाह किया; परन्तु परीक्षित के बाद जनमेजय के समय इस परम्परा की रक्षा नहीं हो पायी। इस प्रकार योग्य कर्ता का अभाव "कलियुग में अश्वमेध निषेध" का एक प्रधान कारण अवश्य माना जा सकता है।

अश्वमेधोपकरणों की उपलब्धता

अश्वमेधयाग भी सोमयाग है। सम्प्रति यह सोमलता[४] दुर्लभ क्या, अलभ्य

---

१. द्र०, भा०पु०, ९.१२.९-१२।

२. (क) महाभा०, नामानुक्रमणिका, (ख) काशी की सारस्वत साधना, म०म० गोपीनाथ कविराज।

३. द्र०, भा०पु०, १९.१२.१६।

४. "अत्र च द्रव्यं सोमरसः । सोमो नाम लताविशेषः। तं कस्माच्चित्पुरुषात् क्रीत्वा ततो रसं निष्काश्य तेन च होमः क्रियते, अत एवास्य सोमयाग इति व्यवहारः। इयं तुलना नेदानीं भारते देशे समुपलभ्यते, पूर्वमपि न सर्वत्रोपलब्धाऽभूत्। द्र०,का०श्रौ०भू०, पृ०४२।

है। सोमयाग होने पर भी इसका प्रधान संज्ञपनीय पशु ''ययु'' नामक जातिविशिष्ट अश्व होता है। ''**ययुरश्वोऽश्वमेधीयः**'' अमरकोश में उक्त लक्षणविशिष्ट, अतिदुर्लभ अश्व का अथवा अश्व से मेघ (हिंसन या संगम) होने के कारण ही इसका अश्वमेध अभिधान है। यद्यपि अश्वमेधमहायाग में अनेक आरण्य एवं ग्राम्य पशुओं का यूपबन्धन होता है[१]; परन्तु पूर्ववर्णित लक्षणविशिष्ट उपर्युक्त ''ययु'' प्रजाति के अश्व में मेध की प्रधानता के कारण इसका अभिधान अश्वमेध है। ययुनामक अश्वमेधोपयुक्त अश्व भी सम्प्रति अनुपलब्ध है। संक्षेप में इन दो प्रधान उपकरणों—सोम एवं ययु की अनुपलब्धता, प्रायः अलभ्यता कलियुग में अश्वमेध निषेध का द्वितीय कारण है।

अश्वमेधयागकर्म की सम्पन्नता की दुर्लभता

कर्म अर्थात् विधि पूर्वनिरूपित है कि अश्वमेधयज्ञ की अनुष्ठान पद्धति असिधाराव्रत के समान है। सम्प्रति ऐसा कर्म भी सर्वथा दुर्लभ है। अत एव अश्वमेध जैसे सुदीर्घ याग कर्म सम्पादन के समस्त भोग उपलब्धि की अनुकूलता रहने पर भी इन्द्रिय संयम रूप चरित्र-रक्षा की दुर्लभता भी कलियुग में अश्वमेधनिषेध का अन्यतम प्रधान कारण है। अश्वमेध महायज्ञ दृष्टादृष्टोभय साधक है। इसके दृष्ट प्रयोजन निम्नलिखित हैं—

१. आर्थिक विकेन्द्रीकरण, २. सामाजिक सद्भाव, ३. स्त्री-पुरुष का सहाधिकार, ४. गतानुगतिकता का निरास, ५. जन्मप्रभृति आनुवंशिक उत्तरदायित्वपूर्ण स्थायी शान्ति के लिए सुदृढ़ शासनपद्धति, विशिष्ट आर्य साम्राज्य की स्थापनार्थ उत्तम-सन्तति-परम्परा की प्राप्ति।

ये सभी विषय अत्यन्त उपादेय हैं, जिनमें प्रथम चार की सिद्धि सम्प्रति भी दृष्ट है। वर्तमान समय में विश्व में अनेक प्रकार की शासन-प्रणालियाँ प्रचलित हैं—

शासन-प्रणालियों के भेद

राजतन्त्र | प्रजातन्त्र | साम्यवाद | समाजवाद | सैनिकशासन

राजतन्त्र: राजायत्त | सचिवायत्त | उभयायत्त

इनमें शासन पद्धतियाँ अश्वमेधोपलब्धिविषयीभूत पूर्वचर्चित पाँच में से चार की प्राप्ति में अवश्य ही अनेक अंश तक सफल हुई हैं; परन्तु

१. द्र०, का०श्रौ०भू०, पृ० ६५।

अश्वमेधयागोपलब्धि में अन्तिम और सर्वप्रधान उपलब्धि को प्राप्त करने में ये सभी शासन-प्रणालियाँ अद्यावधि सर्वथा असफल हैं। स्पष्ट है कि आज विश्व में ऐसी कोई शासन पद्धति प्रचलित नहीं है, जिसके द्वारा अश्वमेध की प्रधान एवं अन्तिम उपलब्धि को गतार्थ किया जा सके। कतिपय विद्वान् शासन पद्धतियों का निम्नलिखित रीति से वर्गीकरण प्रस्तुत करते हैं[१]—

१. एकतन्त्र, २. अधिनायकवादी, ३. सामन्तशाही, ४. कुलतन्त्र-पद्धति, ५. प्रजातन्त्र।

चतुर्युग-प्रमाण

''कालगणना'' भारतीय मनीषियों की ऋतम्भरा प्रज्ञा का एक प्रत्यक्ष व्यावहारिक अद्भुत निदर्शन है। वस्तुतः सूक्ष्म निरीक्षण करने पर यह ज्ञात होता है कि कालगणना मात्र आर्षमेधा का ही आविष्कार है। अन्य सभी मान्यतायें स्वयं कुछ सहस्रवर्ष मात्र पूर्व प्रचलित होने के कारण सूक्ष्मदर्शी बुद्धिजीवी वर्ग के लिए, ''स्थूलारुन्धतीन्याय'' के अनुसार हास्यास्पद न होने पर भी उपेक्षास्पद अवश्य हैं। कालगणना का एक अत्यन्त स्थूल मानदण्ड ''युगव्यवस्था'' है। चतुर्युग प्रमाण के सन्दर्भ में यह मन्तव्य है कि यह सम्पूर्ण सृष्ट जगत् अहोरात्र के अधीन है[२]। कतिपय विद्वान् अहोरात्र शब्द में आदि, अन्त का लोप करके ''होरा'' शब्द की स्थिति मानते हैं, जो एक खण्ड कालविशेष का वाचक है। आंग्लभाषा में प्रसिद्ध ''Hour'' का भी वर्णगत उच्चारण करने पर ''होरा'' शब्द ही पर्यवसित होता है। आचार्य मधुसूदन विद्यावाचस्पति ने अहोरात्र के विषय में दस विभिन्न पक्षों का उपस्थापन किया है[३]। इनके अनुसार ''अहः'' और ''रात्रि'' के विभिन्न रूप इस प्रकार होंगे—

अहः = ज्योतिः, ज्ञानम्, शुक्लः, प्रकाशः, भावः, उदयः, द्यौः, सत्यम्, सूर्य्यरसाः।

---

१. ''क्यों'' उत्तरार्ध, धर्मदिग्दर्शन, माधवाचार्य, पृ० ११२।

२. ''द्वाभ्यां बभूवाखिलवेशमेतद् विद्यादहोरात्रिपदेन ते द्वे।''

(पं०मधुसूदन ओझा, ''अहोरात्रवादः'', पृ० १)

३. ज्ञानाज्ञाने शुक्लकृष्णौ च वर्णौ ज्योतिस्तद्वान्ते विश्वभावोऽप्यभावः सृष्टिध्वंसौ रोदसी चर्तसत्ये सप्ताहो वा यज्ञसामान्यभेदाः, इत्थं चाहोरात्रभेदा दशैते सृष्टे रूपं सैव सर्वास्ति सृष्टिः।

(पं०मधुसूदन ओझा, ''अहोरात्रवादः'', पृ० १)

रात्रिः = तमः, अज्ञानम्, कृष्णः, अन्धकारः, अभावः, प्रलयः, पृथ्वी, ॠतम्, पृथ्वीरसाः।

यहाँ यह मन्तव्य है कि सात प्रधान वर्णों[१] में मूल दो ही हैं, जो कि शुक्ल और कृष्ण भेद से स्पष्ट हैं। **शुक्रं ते अन्यवज्जातं ते अन्यद् विषुवरूपे अहनी द्यौः इव वासि।।**[२]

आचार्य मधुसूदन विद्यावाचस्पति के शब्दों में—

सर्वेऽपि वर्णा यदि चेत् प्रसुप्ता एकत्र लीनाः स्युरयं स कृष्णः ।
सर्वेऽपि वर्णा यदि चेत् प्रबुद्धा एकत्र दुष्टाः स्युरयं स शुक्लः ।।[३]

इन विभिन्न प्रमाणों से अहःरात्रि, शुक्ल-कृष्ण, अन्धकार, स्वर्ग-प्रलयादि शब्दों का वेद में प्रतिपदी अर्थ में प्रयोग हुआ है, ऐसा सिद्ध होता है।

कालविमर्श

चतुर्युगप्रमाण के सन्दर्भ में ''अहोरात्र'' के विभिन्न रूपों का उल्लेख किया गया है; परन्तु यह सभी खण्ड काल का प्रकाशमात्र है। अतः कालसामान्य का ज्ञान सर्वथा अपेक्षित है। प्रश्न है कि काल क्या है? आचार्य अन्नम्भट्ट की भाषा में—**''अतीतादिव्यवहारहेतुः कालः''**।[४] वेदविज्ञानोद्धारक पं० विद्यावाचस्पति के शब्दों में काल के दो भेद हैं। यथा[५]—

काल

अमूर्त — मूर्त

१. (क) ''चक्षुर्मात्रग्राह्यो गुणो रूपम्, तच्च शुक्ल-नील-पीत-कपिश-चित्र-हरित-रक्तभेदात् सप्तविधम्''(तर्कसंग्रहः)।
(ख) पं० मधुसूदनओझामहोदयैस्तु ''सप्तवर्णास्तु योगजाः'' इति प्रत्यपादि। तथा हि— ''धूम्रोऽतिनीलनीलौ हरितः पीतः सुवर्णशोणौ च'' इति सप्त सन्ति योगजवर्णाः, अन्येऽपि योगतोऽनन्ताः''। द्र०, मधुसूदनविद्यावाचस्पतिः ''अहोरात्रवादः''।

२. तत्रत्यवेदार्थप्रकाशसंक्षेपः—''हे पूषन्, ते शुक्लवर्णम् अन्यद् एकम् अहर्भवति वासरात्मकं तथा ते... कृष्णवर्णम् अन्यद् एकम् अहर्भवति रात्र्याख्यम् इत्यादि। (ॠ०वे०,६.५८.१ मोक्षमूलरभट्टसंस्करणम्)।

३. पं० मधुसूदनविद्यावाचस्पतिः, अहोरात्रवादः, शुक्लकृष्णाधिकारप्रकरणम्, पृ०३।

४. द्र० अन्नम्भट्टकृतस्तर्कसंग्रहः।

५. स एष कालो द्विविधोऽस्त्यमूर्तो मूर्तश्च मुख्यस्तु तयोरमूर्तः।
अमूर्तकालक्रमतस्त्वनन्तब्रह्माण्डरूपाः प्रलयोदयाः स्युः।।
(मधुसूदनविद्यावाचस्पति, अहोरात्रवादः, पृ०५)

उक्त विवणानुसार अमूर्त काल में अनेकानेक ब्रह्माण्ड (COSOMOS) आकाशगंगा (MILKWAY) आदि का प्रलय, उदय होता रहता है, एवं प्रलय, उदय आदि के बाद व्यावहारिक जगत् में मूर्त काल का प्रयोग होता है। इसी अमूर्त काल में अनेक सूर्य पुनः पुनः उत्पत्ति एवं विनाश को प्राप्त होते हैं। इस सन्दर्भ में सूर्यस्थितिकाल को शुक्ल एवं सूर्यनाशकाल को कृष्ण कहते हैं। यथा—

सम्भूय सम्भूय विनाशमेवं कालेऽत्र सूर्य्या अपि यान्त्यनन्ताः ।
सूर्यस्थितिस्तत्र च शुक्लकालः सूर्य्यस्य नाशेन स एष कृष्णः ।।[1]

काल
मूर्त — अमूर्त
सूर्यस्थिति (शुक्ल) — सूर्यनाश (कृष्ण)
सूर्यस्थिति (शुक्ल) — सूर्यनाश (कृष्ण)

मूर्त काल के विषय में मन्तव्य है कि यह दृश्यमान सूर्य ही मूर्त काल है। इस सूर्यरूपी मूर्त काल से निमेष-कला-काष्ठादि खण्ड काल का व्यवहार होता है और मूर्त काल रूप सूर्य ही ''अहः'' एवं ''रात्रि'' का विभाग करके सृष्टि-संहार का कार्य संचालित होता है। यथा—

यस्त्वेष मूर्तः प्रथितः स सूर्यः सूर्य्याद्विकालावयवाः प्रथन्ते ।
सूर्यो विभज्यैतदहश्च रात्रिं सृष्ट्वा मुहुः संहरतीह विश्वम् ।।[2]

इनमें भी अहः = दिन को शुक्ल एवं रात्रि को कृष्ण कहा गया है, जिसमें शुक्लकाल चेष्टात्मक एवं कृष्णकाल निश्चेष्टात्मक होता है। दूसरे शब्दों में ''अहः'' एवं ''रात्रि'' को क्रमशः ''सृष्टि'' एवं ''प्रलय'' शब्दों से कहे जाने पर उस सूर्यरूपी मूर्त काल से अहोरात्ररूपी सृष्टि-प्रलय-क्रम चलता रहता है। यथा—

शुक्लस्तु कालः प्रतिपद्यतेह कृष्णोः परः काल इहास्ति रात्रिः ।
अहर्भवेत्कर्म विचेष्टनायै निःशेषभूतस्वपनाय रात्रिः ।।[3]

---

१. द्र०, मधुसूदनविद्यावाचस्पति ''अहोरात्रवादः'', पृ०५।
२. द्र०, तत्रैव, ''सर्गप्रलयकल्पाधिकारः''।
३. (क) अहोरात्रवादः ''सर्गप्रलयकल्पाधिकारः'' पृ०५।
(ख) मनुनाऽप्युक्तम्—
''पित्र्ये रात्र्यहनी मासः प्रविभागस्तु पक्षयोः।
कर्मचेष्टास्वहः कृष्णः शुक्लः स्वप्नाय शर्वरी।। (म०स्मृ०, १.६६)

अह्नस्तु सृष्टिः प्रलयस्तु रात्र्या अहः पुनः स्यात्पुनरेव रात्रिः ।
इत्थं न सृष्टिप्रलयावनन्तौ स्यातामहोरात्रविपर्य्ययेण ।।[१]

चतुर्युगप्रमाण के सन्दर्भ में इस कालगणना की उपयोगिता इस रूप में मान्य है कि पूर्वोक्त अहोरात्र के अनेकानेक भेद हो सकते हैं, जिनमें चार प्रधान भेद आर्ष ग्रन्थों में स्पष्ट हैं। ये सभी सूर्य के कारण होते हैं। यथा—

अहोरात्र

मानुष **पित्र्य** **दैव** **ब्राह्म**[२]

काल के सूक्ष्म परिणाम

निमेष—क्षणद्वयं त्वयः प्रोक्तो निमेषस्तु लवद्वयम्[३]

१८	निमेष	=	१ काष्ठा	=	अष्टादशनिमेषास्तु काष्ठा
३०	काष्ठा	=	१ कला	=	त्रिंशत्तु ताः कला
३०	कला	=	१ क्षण	=	तास्तु त्रिंशत्क्षणः (भिन्नोऽयं शब्दः)
१२	क्षण	=	१ मुहूर्त्त	=	ते तु मुहूर्त्ते द्वादशाः
३०	मुहूर्त्त	=	१ अहोरात्र	=	ते तु त्रिंशदहोरात्रः
१५	दिन	=	१ पक्ष	=	पक्षस्ते दशपञ्च च
२	पक्ष	=	१ मास	=	मासस्तु तावुभौ
२	मास	=	१ ऋतु	=	द्वौ मासौ स्याद् ऋतुः
३	ऋतु	=	१ अयन	=	तैरयनं त्रिभिः
२	अयन	=	१ वर्ष	=	द्वे अयने तु वत्सरः[४]
१	मानुषमास	=	१ पित्र्य अहोरात्र		
१	मानुषवर्ष	=	१ दैव अहोरात्र		

१. द्र०, अहोरात्रवादः, ''सर्गप्रलयकल्पाधिकारः'' पृ०५।

२. ''प्रधानतो मानुषपित्र्यदैवब्राह्माणि यान्यर्कवशाद्भवन्ति।''
(अहोरात्रवादः ''सर्गप्रलयकल्पाधिकारः'', पृ०५)

३. द्र०, अमर० १.४.११।

४. द्र०, अमर० १.४.११-१३।

दैवैः षष्ट्यधिकैस्त्रिभिरहोरात्रशतैर्दिव्यं वर्षम्।

तैर्द्वादशभिः सहस्रैः मानुषं चतुर्युगम्।

तच्च देवानाम् एकं युगम्।

तत्सहस्त्रं ब्रह्मणो दिनम्	=	भूतानां स्थितिकालः, तावत्येव रात्रिः प्रलयकालः
१ ब्राह्म अहोरात्र	=	१ मानुष कल्प
७१ दैव युगृ	=	१ मन्वन्तर = मन्वन्तरं तु दिव्यानां युगानामेकसप्ततिः।

अमरकोशानुसार कालमानबोधक विवरण[१]

१ निमेष	= अक्षिपक्ष्मविक्षेपो निमेषः।	
१८ निमेष	= १ काष्ठा	
३० काष्ठा	= १कला	
३० कला	= १ मुहूर्त	
३० मुहूर्त	= १ अहोरात्र	
१५ अहोरात्र	= १ पक्ष	
२ पक्ष	= १ मास	
१२ मास	= १ वर्ष	= १ दिव्यहारात्र
३६० दिव्याहोरात्र	= ३६० मानुषवर्ष	= १ दिव्यवर्ष
४००० दिव्यवर्ष	= १४,४०,००० मानुषवर्ष	= सत्ययुग का मुख्यमान
३००० दिव्यवर्ष	= १०,८०,००० मानुषवर्ष	= त्रेतायुग का मुख्यमान
२००० दिव्यवर्ष	= ७,२०,००० मानुषवर्ष	= द्वापरयुग का मुख्यमान
१००० दिव्यवर्ष	= ३,६०,००० मानुषवर्ष	= कलियुग का मुख्यमान

१२,००० दिव्यवर्ष = ४३,२०,००० सन्ध्यासन्ध्यांश-सहित चतुर्युग पूर्णमान

१,२०० × ७१ दिव्यवर्ष= ४३,२०,००० × ७१ = मन्वन्तर

८,५२,००० दिव्यवर्ष = ३०,६७,२०,०००

१. द्र०, अमर०, १.४.२१ पं० हरगोविन्दशास्त्री, टिप्पणी, पृ०६६।

चतुर्युग प्रमाण—इस ज्ञान सुविधा के लिए युगक्रम निम्नलिखित है—

(क) सत्य, (ख) त्रेता, (ग) द्वापर, (घ) कलि।

कलियुग का जितना कालमान है, तद्द्विगुण द्वापर, तत्त्रिगुण त्रेता, तच्चतुर्गुण सत्य।

(क) कलिकालमान = तद्द्विगुण द्वापर
(ख) कलिकालमान = तत्त्रिगुण त्रेता
(ग) कलिकालमान = तच्चतुर्गुण सत्य

युगविचार

उपर्युक्त समस्त कालमानदण्डों में मानुष-पित्र्य-दैववर्ष तीनों प्रमाणों को स्पष्ट कर दिया गया है। सम्प्रति प्रतियुग कालपरिणाम को स्पष्ट किया जा रहा है।

कलियुग का पृथक् प्रमाण

दिव्य एक सहस्रवर्ष = कलियुग
दिव्य दो सहस्रवर्ष = द्वापरयुग
दिव्य तीन सहस्रवर्ष = त्रेतायुग।
दिव्य चार सहस्रवर्ष = सत्ययुग।

यथा[१]—

दिव्यं कलिर्वर्षसहस्रमेकं द्वे द्वापरस्त्रीणि तु तानि तत्र ।
त्रेताथ चत्वारि कृतं शतानि पूर्वत्र परत्र सन्धिः ।।

इसके अतिरिक्त प्रत्येक पूर्वयुग की समाप्ति एवं परयुग के प्रारम्भ में सन्धि-सन्ध्यांश काल भी स्वीकृत है। इनमें युग के पूर्व को सन्धि एवं युग के उत्तर को सन्ध्यांश कहते हैं, यथा[२]—

तत् प्रमाणैः शतैः सन्ध्या पूर्वा तत्राभिधीयते ।
सन्ध्यांशकश्च तत्तुल्यो युगस्यानन्तरो हि सः ।।

सन्ध्या एवं सन्ध्यांश के मध्यकाल को युग कहते हैं। यथा[३]—

---

१. द्र०, अमर०, पृ० ५-६ श्लोकसंख्या २५।
२. द्र०, वि०पु०, मन्वर्थमुक्तावल्यां प्रथमाध्याये उद्धृतम्। अन्यत्रापि यथा—
सन्ध्यांशयोरन्तरेण य कालः शतसंख्ययोः।
तमेवाहुर्युगं तज्ज्ञा यत्र धर्मो विधीयते।। (भा०पु०, ३.११.२०)
३. द्र०, वि०पु० मन्वर्थमुक्तावल्यां प्रथमाध्याये उद्धृतम्।

सन्ध्यासन्ध्यांशयोरन्तरं यः कालो मुनिसत्तम ।
युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञकः ।।

चतुर्युग का मानुष प्रमाण

प्रतियुग की मानुष गणनानुसार कालमान इस प्रकार है—

युगक्रम (मानुषवर्षमान)

सत्य	त्रेता	द्वापर	कलि
(१७,२८,०००) मानुषवर्ष	(१२,९६,०००) मानुषवर्ष	(८,६४,०००) मानुषवर्ष	(४,३२,०००) मानुषवर्ष

उपर्युक्त प्रमाण से भी पूर्वोक्त सिद्धान्त सिद्ध होता है कि द्वापर-त्रेता-सत्य युग कलियुग के क्रमशः द्विगुण-त्रिगुण-चतुर्गुण हैं। पूर्वोल्लिखित समस्त तथ्यों का एकत्र संकलन— **''बिन्दुत्रयं चेति कलेः प्रमाणं द्विस्त्रिश्चतुश्चेति युगान्तराणि''**[1]।

चतुर्युग का मानुष एवं दिव्य प्रमाण

चतुर्युग

मानुषमान	दिव्यमान
४३,२०,००० मानुषवर्षों की एक चतुर्युगी	दश-सहस्र दिव्यवर्षों की एक चतुर्युगी[2]

चतुर्युग के विषय में कतिपय विशेष तथ्य

१. **सत्ययुगारम्भ**—गणना-चान्द्र, मास-वैशाख, पक्ष-शुक्ल, तिथि-तृतीया (अक्षय), वार-रवि। यह सत्ययुगादि है, अर्थात् चान्द्रगणनानुसार वैशाख शुक्ल अक्षय तृतीया रविवार में सत्य युग आरम्भ हुआ। इसका कालपरिमाण, १७,२८,००० मानुषवर्षात्मक है। सत्ययुग में चार अवतार हुए थे—मत्स्य, कूर्म, वराह, नृसिंह। सत्य एवं त्रेता के संधिकाल में परशुराम एवं कार्तवीर्यार्जुन का युद्ध प्रसिद्ध है।

२. **त्रेतायुग**—गणना-चान्द्र, मास-कार्तिक, पक्ष-शुक्ल, तिथि-नवमी, वार-सोम। यह त्रेतायुगादि है, अर्थात् चान्द्रगणनानुसार कार्तिक शुक्ल नवमी सोमवार

---

१. द्र०, पं०मधुसूदनविद्यावाचस्पति ''अहोरात्रवाद'', पृ०६।

२. ''सत्यत्रेताद्वापरकलयश्चेति चत्वारो युगाः चतुर्युगी। स एव महायुग इत्यपि कथ्यति।''

में त्रेतायुगारम्भ हुआ। इसका कालपरिमाण, १२,९६,००० मानुषवर्षात्मक है। त्रेतायुग में तीन अवतार हुए थे—वामन, परशुराम, श्रीराम, त्रेता-द्वापर के सन्धिकाल में श्रीराम-रावण का युद्ध प्रसिद्ध है।

३. **द्वापरयुगारम्भ**—गणना-चान्द्र, मास-भाद्रपद, पक्ष-कृष्ण, तिथि-त्रयोदशी, वार-बृहस्पति। यह द्वापरयुगादि है, अर्थात् चान्द्र गणनानुसार भाद्रपद कृष्णपक्ष त्रयोदशी तिथि बृहस्पतिवार को द्वापरयुगारम्भ हुआ। इसका काल-परिमाण ८,६४,००० मानुषवर्षात्मक है। इसमें श्रीकृष्ण अवतार प्रसिद्ध है। द्वापर एवं कलि के सन्धिकाल में महाभारत युद्ध प्रसिद्ध है।

४. **कलियुगारम्भ**—गणना-चान्द्र, मास-माघ, पक्ष-शुक्ल, तिथि-पूर्णिमा, वार-शुक्र। यह कलियुगादि है, अर्थात् चान्द्र गणनानुसार माघ मास की पूर्णिमा तिथि शुक्रवार को कलियुगारम्भ हुआ। इसका काल-परिमाण ४,३२,००० मानुषवर्षात्मक है। इसमें बुद्ध एवं कल्कि दो प्रसिद्ध अवतार हैं।

कलियुगारम्भ एवं अतीतकलिवर्ष

